# shrI rAjagopAlAShTottarashata nAmAvaliH

# श्रीराजगोपालाष्टोत्तरशतनामावलिः

## Document Information

Text title : rAjagopAlAShTottarashatanAmAvalI

File name : rAjagopAla108.itx

Category : aShTottarashatanAmAvalI, vishhnu, krishna, nAmAvalI, vishnu

Location : doc_vishhnu

Transliterated by : N.Balasubramanian

Proofread by : N.Balasubramanian

Latest update : November 2, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 2, 2022

*sanskritdocuments.org*

# श्रीराजगोपालाष्टोत्तरशतनामावलिः

अथवा चम्पकारण्यनाथाष्टोत्तरशतनामावलिः

ॐ श्री कृष्णाय नमः ।
ॐ श्री राजगोपालाय नमः ।
ॐ श्रीकान्ताय नमः ।
ॐ देवकीसुताय नमः ।
ॐ चम्पकेश्वराय नमः ।
ॐ श्रीमते नमः ।
ॐ गोविन्दाय नमः ।
ॐ गरुडध्वजाय नमः ।
ॐ वासुदेवाय नमः ।
ॐ अरविन्दाक्षाय नमः । १०।
ॐ चम्पकारण्यनायकाय नमः ।
ॐ रुक्मिणीवल्लभाय नमः ।
ॐ विष्णवे नमः ।
ॐ गोभिलामिष्टदायकाय नमः ।
ॐ केशवाय नमः ।
ॐ केशिसंहारिणे नमः ।
ॐ कालिन्दीरमणाय नमः ।
ॐ हरये नमः ।
ॐ स्वायम्भुवविमानस्थाय नमः ।
ॐ सदागोप्रलयार्चिताय नमः । २०।
ॐ दक्षिणद्वारकानाथाय नमः ।
ॐ चम्पकवनाश्रयाय  नमः ।
ॐ हरिद्रातटिनीतीरविलासिने नमः ।
ॐ विश्ववन्दिताय नमः ।

ॐ नन्दसूनवे नमः ।
ॐ यदुश्रेष्ठाय नमः ।
ॐ नारदस्तुतवैभवाय नमः ।
ॐ राजशेखरराजेन्द्र-कृतघ्नविमोचकाय नमः ।
ॐ राधापयोधरासक्ताय नमः ।
ॐ राजशेखरपूजिताय नमः । ३०।
ॐ माधवाय नमः ।
ॐ मधुरानाथाय नमः ।
ॐ महामायाय नमः ।
ॐ अघनाशनाय नमः ।
ॐ नारायणाय नमः ।
ॐ हृषीकेशाय नमः ।
ॐ श्रीधराय नमः ।
ॐ गोपिकासुताय नमः ।
ॐ दामोदराय नमः ।
ॐ जगन्नाथाय नमः । ४०।
ॐ भगवते नमः ।
ॐ पुरुषोत्तमाय नमः ।
ॐ उरुगाय नमः ।
ॐ त्रिलोकेशाय नमः ।
ॐ वामनाय नमः ।
ॐ मधुसूदनाय नमः ।
ॐ त्रिभङ्गिमधुराकाराय नमः ।
ॐ परमात्मने नमः ।
ॐ त्रिविक्रमाय नमः ।
ॐ लावण्यधाम्ने नमः । ५०।
ॐ नित्यश्रिये नमः ।
ॐ सत्यभामाप्रियङ्कराय नमः ।
ॐ वेत्रराजितहस्ताग्राय नमः ।
ॐ वेणुनादविनोदवते नमः ।
ॐ सत्यभामांसविन्यस्त-वामपाणिसरोरुहाय नमः ।
ॐ मन्दस्मितमुखाम्भोजाय नमः ।

ॐ मङ्गलालयविग्रहाय नमः ।
ॐ श्रीचम्पकमहीपालाय नमः ।
ॐ विजयप्रियसारथाये नमः ।
ॐ यशोदानन्दजनकाय नमः । ६०।
ॐ दधिभाण्डप्रभेधनाय नमः ।
ॐ दधिबिन्दुलसत्गात्राय नमः ।
ॐ नवनीतापहारकाय नमः ।
ॐ उलूकलनिबद्धाङ्गाय नमः ।
ॐ मुकुन्दाय नमः ।
ॐ मुक्तिदायकाय नमः ।
ॐ आश्चर्यमूर्तये नमः ।
ॐ आर्तिघ्नाय नमः ।
ॐ नन्दगोपविमोचकाय नमः ।
ॐ भक्तप्रियाय नमः । ७०।
ॐ भक्तवत्सलाय नमः ।
ॐ भृगुसेव्याङ्घ्रिपङ्कजाय नमः ।
ॐ वत्सदानवसंहर्त्रे नमः ।
ॐ वत्सलाय नमः ।
ॐ वत्सपालकाय नमः ।
ॐ गोवर्धनाचलधराय नमः ।
ॐ गोपालाय नमः ।
ॐ गोकुलेश्वराय नमः ।
ॐ आभीरकामिनीकान्ताय नमः ।
ॐ बालाय नमः । ८०।
ॐ शकटभेदनाय नमः ।
ॐ वेत्रधारिणे नमः ।
ॐ वृन्दाध्यक्षाय नमः ।
ॐ वसुदेवपुरीश्वराय नमः ।
ॐ बर्हावतंसरुचिराय नमः ।
ॐ वृन्दावनरतोत्सुकाय नमः ।
ॐ त्रिणताग्रमहारत्न-गोपदण्डलसत्कराय नमः ।
ॐ हारभासततिश्लाघ्याय नमः ।

ॐ चाम्पेयकुसुमप्रियाय नमः ।
ॐ कमलार्चितपादाब्जाय नमः । ९०।
ॐ कमलासनवन्दिताय नमः ।
ॐ रक्ताब्जनायिकानाथाय नमः ।
ॐ रासक्रीडारतोत्सुकाय नमः ।
ॐ हरिद्रासिन्धुसलिलक्रीडासक्तवधूविटाय नमः ।
ॐ वेणुवाद्यैकरसिकाय नमः ।
ॐ देवाय नमः ।
ॐ वैणविकोत्तमाय नमः ।
ॐ गानोद्धूतोष्टचेष्टाय नमः ।
ॐ सिद्धनारीपरिष्कृताय नमः ।
ॐ प्रणयस्कन्धनिक्षिप्त-भुजमालाविराजिताय नमः । १००।
ॐ सम्प्राप्तदिव्यस्त्रीभावाय नमः ।
ॐ मुक्तसङ्गवरप्रदाय नमः ।
ॐ पीताम्बराय नमः ।
ॐ घनश्यामाय नमः ।
ॐ वनमालिने नमः ।
ॐ जनार्दनाय नमः ।
ॐ चम्पकारण्यनिलयाय नमः ।
ॐ दक्षिणद्वारकेश्वराय नमः । १०८

ॐ श्री रुक्मिणीसत्यभामासमेत श्री राजगोपालपरब्रह्मणे नमः ।

॥ इति श्रीराजगोपालाष्टोत्तरशतनामावलिः सम्पूर्णा ॥

॥ हरिः ॐ ॥

Endoded by N. Balasubramanian

*shrI rAjagopAlAShTottarashata nAmAvaliH*

pdf was typeset on November 2, 2022

Please send corrections to *sanskrit@cheerful.com*